श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५१

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५१

*अघासुरवधवर्णनम्*

कदाचन व्रजशिशुभिः समं भवान् वानाशने विहितमतिः प्रगेतराम्।
समावृतो बहुतरवत्समण्डलैः सतेमनैर्निरगमदीश जेमनैः॥ १॥

विनिर्यतस्तव: चरणाम्बुजद्वयादुदञ्चितं त्रिभुवनपावनं रजः।
महर्षयः पुळकधरैः कलेबरैरुदूहिरे धृतभवदीक्षणोत्सवाः॥ २॥

प्रचारयत्यविरळशाद्वले तले पशून् विभो भवति समं कुमारकैः।
अघासुरो न्यरुणदघाय वर्तनीं भयानकः सपदि शयानकाकृतिः॥ ३॥

महाचलप्रतिमतनोर्गुहानिभप्रसारितप्रथितमुखस्य कानने।
मुखोदरं विहरणकौतुकाद्गताः कुमारकाः किमपि विदूरगे त्वयि॥ ४॥

प्रमादतः प्रविशति पन्नगोदरं क्वथत्तनौ पशुपकुले सवात्सके।
विदन्निदं त्वमपि विवेशिथ प्रभो सुहृज्जनं विशरणमाशु रक्षितुम्॥ ५॥

गळोदरे विपुलितवर्ष्मणा त्वया महोरगे लुठति निरुद्धमारुते।
द्रुतं भवान् विदलितकण्ठमण्डलो विमोचयन् पशुपपशून् विनिर्ययौ॥ ६॥

क्षणं दिवि त्वदुपगमार्थमास्थितं महासुरप्रभवमहो महो महत्।
विनिर्गते त्वयि तु निलीनमञ्जसा नभःस्थले ननृतुरथो जगुः सुराः॥ ७॥

सविस्मयैः कमलभवादिभिः सुरैरनुद्रुतस्तदनु गतः कुमारकैः।
दिने पुनस्तरुणदशामुपेयुषि स्वकैर्भवानतनुत भोजनोत्सवम्॥ ८॥

विषाणिकामपि मुरळीं नितम्बके निवेशयन् कबळधरः कराम्बुजे।
प्रहासयन् कळवचनैः कुमारकान् बुभोजिथ त्रिदशगणैर्मुदा नुतः॥ ९॥

सुखाशनं त्विह तव गोपमण्डले मखाशनात् प्रियमिव देवमण्डले।
इति स्तुतस्त्रिदशवरैर्जगत्पते मरुत्पुरीनिलय गदात् प्रपाहि माम्॥ १०॥

**********